श्रीमते रामानुजाय नमः

# ॥ गीताध्यानम्॥

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयम्
व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम्।

अद्वैतामृतवर्षिणीं भगवतीं अष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम्॥ १

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायत पत्रनेत्र।
येन त्वया भारततैल पूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः॥ २

प्रपन्न पारिजाताय तोत्रवेत्रै कपाणये।
ज्ञानमुद्राय कृष्णाय गीताऽमृत्दुहे नमः॥ ३

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥ ४

वसुदेवसुतं देवं कंसचाणूर मर्दनम्।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम्॥ ५

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला।

अश्वत्थाम विकर्ण घोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः॥ ६

श्रीमते रामानुजाय नमः

पाराशर्य वचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथा सम्बोधनाबोधितम्।

लोके सज्जन षट्पदैरहरहः पेपीयमानं मुदा
भूयाद् भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे॥ ७

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्द माधवम्॥ ८

यं ब्रह्मा वरुनेन्द्र रुद्र मरुतः स्तुन्वन्ति दिव्यैः स्तवैः।
वेदैः साङ्गपदक्रमोपनिषदैः गायन्ति यं सामगाः॥

ध्यानावस्थित तद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः॥ ९

**॥ गिताध्यानं संपूर्णम्॥**